स गतः पुत्रसहितो जनकस्याश्रमं द्विजः । तत्र वादोऽभवत्तेषां विप्रैरन्यैर्नृपोत्तम ॥२
क्रोधाविष्टेन वै तत्र हतः कौथुमिना द्विजः । ते दृष्ट्वा हतं विप्रं त्यक्तः पित्रा स कौथुमिः ॥३
भ्रातृभिश्च महाबाहो तथा शिष्टैश्च कृत्स्नशः । प्रत्युक्तः स च सर्वैस्तु शोकदुःखसमन्वितः ॥४
तीर्थानि स जगामाथ दिव्यान्यायतनानि च । न च मुक्तस्त्वसौ विप्रः सहसा ब्रह्महत्यया ॥५
अमुक्तेऽथ तया विप्रे परो व्याधिरजायत । कर्णनासाविहीनस्तु पूयशोणितविस्रवः ॥६
पृथिवीं पर्यटन्सर्वां पुनरागात्पितुर्गृहम् । दुःखोपहतचित्तस्तु पितरं वाक्यब्रवीत् ॥७
पितर्गतस्तु तीर्थानि पुण्यान्यायतनानि च । मुक्तोऽस्मि नानया तात क्रूरया ब्रह्महत्यया ॥८
कृतेऽपि हि परे तात प्रायश्चित्ते तु मेऽनघ । किं करोमि क्व गच्छामि तातातीव रुजो मम ॥९
कृतेन कर्मणा येन अल्पायासेन मे विभो । नश्येत्तु ब्रह्महत्येयं व्याधिश्चायं परन्तप ॥१०
कथ्यतां मा चिरं तात कुरु निःश्रेयसं मम । हिरण्यनाभो विप्रस्तु श्रुत्वा वाक्यं सुतस्य तु ॥
शोकदुःखाभिभूतस्तु वाक्यं पुत्रमुवाच ह ॥११

## हिरण्यनाभ उवाच

ज्ञातः पुत्र तव क्लेशः प्राप्तो यस्त्वटता महीम् ॥१२
तीर्थानि च त्वया वत्स प्रायश्चित्तानि कुर्वता । न चापि ब्रह्महत्या त्वां मुञ्चते मत्कुलोद्वह ॥१३

---

समय में एक उत्तम ब्राह्मण था, महान् विद्वान् उसने अपने पुत्र को साथ लेकर राजा जनक के यहाँ प्रस्थान किया। वहाँ पहुँचकर जनक जी के प्रतिष्ठित विद्वानों के साथ उसके पुत्र से वाद-विवाद हो गया।१-२। नृपोत्तम ! क्रोध के आवेश में आकर उसके पुत्र कौथुमि ने किसी एक ब्राह्मण की हत्या कर डाली। ब्राह्मण की हत्या देखकर उसके पिता ने कौथुमि का त्याग कर दिया। महाबाहो ! उसी भाँति उसके

उपायमेकं वक्ष्यामि येन त्वं मोक्षमाप्स्यसि । अल्पायासेन वै पुत्र शृणुष्व गदतो मम ॥१४

कौथुमिरुवाच

आराधयामि कं देवं ब्रह्मादीनां कथं विभो । शरीरेण विहीनोऽस्मि हेतुना सर्वकर्मणाम् ॥१५

हिरण्यनाभ उवाच

सिद्धिसन्ततियुक्तेन कर्मणा तुष्टिमाप्नुयुः । देवैरपि सुपूज्योऽयमुपलेपनमार्जनैः ॥१६
भानुरेको द्विजश्रेष्ठ ऊचुरेवं मनीषिणः । ब्रह्मा विष्णुर्महादेवो जलेशो धनदस्तथा ॥१७
भानुमाश्रित्य सर्वे ते मोदन्ते दिवि पुत्रक । तस्माद्भानोः समं देवं नाहं पश्यामि कञ्चन ॥१८
एवं भानुं सर्वमान्यमधुनाखिलकामदम् । पितरं मातरं तात नराणां नात्र संशयः ॥१९
तमाराधय वै भक्त्या जपन्मन्त्रमनुत्तमम् । इतिहासपुराणानि शृणु श्रद्धासमन्वितः ॥२०
आरधयन्रविं भक्त्या जपन्साम महामते । पुराणानि ततो लोके मोक्षं प्राप्स्यसि पुत्रक ॥२१

कौथुमिरुवाच

दिश सामानि वै तात प्रवराणि महामते । ॐकारप्रवरोद्गीथं प्रस्थानं च चतुष्टयम् ॥२२
पञ्चमः परिहारोऽत्र षष्ठमाहुस्तमद्भुतम् । निधनं सप्तमं साम्नां साप्तविध्यमिति स्मृतम् ॥२३
साप्तविध्यमिति प्रोक्तं हिङ्कारप्रणवेषु च । अष्टमं च तव शाठ्यं नवमं वामदेविकम् ॥२४

---

हो सके । मत्कुलकमल ! एक उपाय जिसके द्वारा तुम्हें इस कष्ट से मुक्ति प्राप्त हो जायेगी, पुत्र ! वह अल्प प्रयत्न साध्य है, मैं बता रहा हूँ सुनो ! ।१२-१४

**कौथुमि ने कहा—**विभो ! किस देव की आराधना करूँ, ब्रह्म आदि देवों की आराधना इस शरीर

ज्येष्ठं तु दशमं साम वेधसे प्रियमुत्तमम् । एतेषां तात साम्नां वै कण्ठे जाप्यं परं मतम् ॥
जपित्वा तु अहं शक्त्या गच्छामि परमं पदम् ॥२५

## हिरण्यनाभ उवाच

साधु पुत्रं कुलं पूतं त्वत्पुत्रेण समेन च ॥२६
एवं गतस्यापि हि ते जाता पुत्र विधेः स्मृतिः । एवं तात न सन्देहः सामान्येतानि पुत्रक ॥२७
प्रवराणि हि साम्ना वै ब्रह्मणा कथितानि ह । एषामपि परं प्रोक्तं सामद्वयमनुत्तमम् ॥
तस्मादेकं परं जाप्यं सर्वपापभयापहम् ॥२८

## कौथुमिरुवाच

कथ्यतां तात तच्छीघ्रं यत्तु सामद्वयं परम् । एतेषां तात साम्नां तु नान्यज्जाप्यं च यद्भवेत् ॥२९

## हिरण्यनाभ उवाच

ज्येष्ठसामपरं पूर्वं द्वितीयं गदतः शृणु ॥३०
ततः श्राव्यं तृतीयं तु जप्तव्यं मुक्तिमिच्छता । ततश्च परमं प्रोक्तं स्वयं देवेन भानुना ॥३१
स्वयं दैवतमादिष्टं छन्दसामुत्तमं व्रतम् । प्रियं हिरण्यगर्भस्य प्रियं सूर्यस्य सर्वदा ॥३२
जपश्च विनियोगोऽपि लक्षणं च निबोध मे । सत्येन स्वरलीनस्तु शूकरादि स्मृतं बुधैः ॥३३
ऋतुर्भावस्तथा धर्मो विधर्मः सत्यकृत्तथा । धर्माधर्मौ तथा कार्यौ धर्मवेदनमेव च ॥३४
यदेभिर्गीयते शब्दै रुचिरं समयैर्द्विजैः । जाप्यं तत्परमं प्रोक्तं स्वयं देवेन भानुना ॥३५

---

सामों को कण्ठस्थ जपकर, (क्योंकि यही (कण्ठस्थ) जप उत्तम बताया गया है) मैं परम पद की प्राप्ति

एतद्वै जपमानस्तु पुनरावर्तते न तु । सर्वरोगविनिर्मुक्तो मुच्यते ब्रह्महत्यया ।।३६
एतज्जाप्यं तु सञ्जप्य आराधय दिवाकरम् । गायन्साम तव प्रोक्तं शृणु पौराणिकं सुत ।।३७
ज्येष्ठसाम्नोऽपि ते पुत्र लक्षणं कथयामि हि । आद्यायादाज्यदोहेति ज्येष्ठसाम्नोऽपि लक्षणम् ।।३८
तव श्राव्यं जपं पुत्रज्येष्ठगायै रविः सदा । समाराधय शृण्वन्वै पुत्राणामिव पुत्रक ।।
एवमाराध्य देवेशं ततो दुःखं प्रहास्यसि ।।३९

## सुमन्तुरुवाच

ततः श्रुत्वा पितुर्वाक्यं सामगः कौथुमिस्तथा ।।४०
आराधयामास रविं भक्त्या श्रद्धासमन्वितः । ततः श्राव्यं जपन्राजंस्त्रिकाले पुरतो रवेः ।।४१
शृण्वतस्तु पुराणानि ब्रह्महत्या गता सदा । व्याधिश्च कुरुशार्दूल फलमेतच्छ्रुतस्य वै ।।४२
जपता यत्फलं तेन देवं पूजयता नृप । सोऽपि प्राप्तो रविं राजञ्छृणुष्वैकमना नृप ।।४३
स गतो मूर्तिमान्विप्रः प्रसादाद्भास्करस्य तु । प्रविश्य मण्डलं भानोः पदं यत्परमं विभोः ।।४४
आवर्तते न चाद्यापि गतोऽसौ परमं पदम् । इति ते कथितं राजन्गतः सिद्धिं महाद्विजः ।।४५
उपोष्येमां भवेद्वीर सप्तमीं याति भास्करम् । कौथुमिर्नरशार्दूल प्रसादाद्भास्करस्य तु ।।४६
जपमानस्तु वै सोऽपि पुराणश्रवणस्तथा । इत्येषा कथिता राजन्प्रथमा सप्तमी तथा ।।४७

---

पुनर्जन्मा नहीं होता है, समस्त रोगों की मुक्ति पूर्वक वह ब्रह्म हत्या से भी छुटकारा पा जाता है ।३६। इसी के जपपूर्वक तुम सूर्य की आराधना करो । तुम्हें इस प्रकार साम गायन का वर्णन बता दिया गया, सुत ! पर्व पौराणिक का लक्षण बताया जा रहा है, सुनो ! पुत्र ! ज्येष्ठ साम के लक्षण भी तुम्हें बता रहा

अर्कस्य पुटिका पुण्या वित्तदा या प्रिया रवेः ॥४८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेऽर्कसम्पुटिकानामसप्तमीव्रतवर्णनं नामैकादशाधिकद्विशततमोऽध्यायः ।२११।

# अथ द्वादशाधिकद्विशततमोऽध्यायः

## सौरार्चनविधिवर्णनम्

### सुमन्तुरुवाच

इत्येषा कथिता वीर अर्कसम्पुटिका तव । द्वितीया मरिचैर्या तु शृणुष्व गदतो मम ॥१

शुक्लपक्षे तु चैत्रस्य षष्ठयां सम्यगुपोषितः । पूजयेद्भास्करं भक्त्या सौरधर्मविधानतः ॥२

### शतानीक उवाच

ब्रूहि सर्वान्मम ब्रह्मन्मन्त्रान्पुण्यान्विशेषतः । सूर्यादिहृदयं चापि शिरोन्यासयुतांस्तथा ॥३

### सुमन्तुरुवाच

अहं ते कथयिष्यामि रहस्यं परमं विभो । यदुक्तं ब्रह्मणा पूर्वं भक्त्या भानोर्महात्मनः ॥४

सर्वपापक्षयार्थाय तच्छृणुष्व महामते । सर्वपापहरं पुण्मादित्यं लोकपूजितम् ॥५

शिखादामसमायुक्तं वकारामृतमुत्तमम् । ॐ वं फट् । ॐ एष सूर्यः स्वयं तात मन्त्रमूर्तिर्महाबलः ॥६

---

सप्तमी, जो पुण्य, एवं धन प्रदान करने वाली होती है, और सूर्य को अत्यन्त प्रिय है, बता दी गई।४५-४८

श्रीभविष्यमहापुराण में ब्राह्म पर्व के सप्तमी कल्प के सौरधर्म में अर्कसंपुटिका सप्तमी व्रत-वर्णन

अस्यानुस्मरणान्मन्त्री नित्यं मधुरभोजनः । संवत्सरेण देवेशं साक्षाद्भानुं प्रपश्यति ॥७
व्याधिमृत्य्वोश्च निर्मुक्तः सूर्यलोकं स गच्छति । सततं जपमानस्तु राजन्मन्त्रविदां वरः ॥८
मनसा कर्मणा वाचा शापानुग्रहतोऽपि वा । क्षीराशी मौनमाश्रित्य विविक्ते नियतेन्द्रियः ॥९
जपित्वा द्वादशलक्षं सशरीरो दिवं व्रजेत् । त्रैलोक्यं चरते राजश्चिन्तामणिरिवेच्छया ॥१०
अथेदं परमं वामं सूर्यस्य हृदयं शृणु । स्मर्तव्यं शुचिना नित्यं सर्वपापभयापहम् ॥११
वियुक्तं चन्द्रसंयुक्तमृकारेण च भारत । ॐकारदीपितं चैव हृदयं परिकीर्तितम् ॥१२
यकारबिन्दुसंयुक्तं वैशाखः कथितो बुधैः । यकारश्च वकारश्च मात्रा बिन्दुस्तथा नृप ॥१३
इष्टं कवचमादिष्टमस्त्रं वक्ष्ये निबोध मे । प्रणवादिं टुकारं च सानुस्वारं कटस्तथा ॥१४
इदमस्त्रं स्मृतं राजन्नमृतं च निबोध मे । बिन्दुचन्द्रसमायुक्तं वकारममृतं स्मृतम् ॥१५
ॐ ब्रह्मास्त्रममृतं गायत्रीं चापि तेरतोरां धेनुर्वै परिकीर्तितम्। यकारश्च वकारश्च रिरोवेत्रमादिशेत्॥१६
व्यनेत्र एतान्यङ्गानि सूर्यस्यामिततेजसः । आदित्यं मूर्ध्नि विन्यस्य हृदये हृदयं न्यसेत् ॥१७
सावित्री कण्ठदेशे तु अशेषं मूर्ध्नि चिन्तयेत् । अर्कन्यासो मयाख्यातो विद्वान्न्यासं प्रकल्पयेत् ॥१८
एकाक्षरस्य सूर्यस्य शृण्वर्चनविधिं परम् । प्रथमं किंकिणीमुद्रां बध्द्वा तु हृदये नृप ॥१९
प्राणायामे च तथा परिवीरसमन्वितम् । एकाक्षरं समावेत्ति आत्मशुद्ध्यर्थमादरात् ॥२०

---

यह मंत्र मूर्तरूप, महाबली, एवं स्वयं सूर्य रूप है, इसका अनुष्ठान करने वाला, इस मंत्र केस्मरण मात्र से मधुर भोजन प्राप्त करता है । इस प्रकार एक वर्ष तक इसके अनुष्ठान करने से सूर्य के साक्षात् दर्शन भी प्राप्त होते हैं ।५-७। राजन् ! वह मंत्र वेत्ता निरन्तर जप करके व्याधि एवं मृत्य से मुक्त होकर सूर्य लोक की प्राप्ति करता है । मन, वाणी, एवं शरीर द्वारा अनुष्ठान के पालन पूर्ण करते हुए क्षीर भोजी मौन,

॥२१
पुनस्त्वामेव बध्यं तु वकारेणात्मना लभेत्
एतत्कृत्वादित्यसमो भवतीति न संशयः । कृत्वा च मुद्रां प्रासादे अस्त्रं योज्य महीपते ॥२२
प्रासादशोभनं स्याद्वै कृत्वा तद्भरतर्षभ । कवचेनार्कवाञ्छत्रुं क्षालयेद्वर्धनक्रियाम् ॥२३
ततोऽर्घ्यपात्रं पुष्पैश्च पूजयेद्विधिवन्नृप । हृदि ना स्नापयेद्देवं ततः पूजां समाचरेत् ॥२४
पद्ममुद्रा पुष्पगर्भा देवं शिरसि विन्यसेत् । आवाहितो भवेदेवं देवदेवो दिवाकरः ॥२५
हृदयेनार्घ्यसंयुक्तां पूजां बध्नीत भारत । हृदयेन च नैवेद्यं दातव्यं शक्तितो विभोः ॥२६
यथाशक्ति जपं कुर्यात्सुव्रती वाग्यतेन्द्रियः । अनेन विधिना राजन्सर्वकार्याणि साधयेत् ॥२७
न क्वचित्प्रतिघातः स्यान्न चापि दुरितं भवेत् । व्योममुद्रां परं बध्द्वा कृत्वा चापि प्रदक्षिणम् ॥२८
॥२९
देवं विसर्जयेत्पश्चाद्धृदयेन महीपते

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सौरार्चनविधिवर्णनं नाम द्वादशाधिकद्विशततमोऽध्यायः ।२१२।

# अथ त्रयोदशाधिकद्विशततमोऽध्यायः

## सौरार्चनविधिवर्णनम्

### सुमन्तुरुवाच

दृष्ट्वा तु पावकं देवं पावकस्थं दिवाकरम् । अव्यात्तु सपरीवारं घुकारं परिकीर्तयेत् ॥१

---

द्वारा आत्मालम्भन करे । महीपते ! इस प्रकार प्रासाद पर मुद्रा की रचना कर एवं अस्त्र समेत उसे सुसम्पन्न करने पर वह सूर्य के समान हो जाता है, इसमें संदेह नहीं । भरतर्षभ ! ऐसा करने से प्रासाद सुशोभित होता है । कवच के धारण करने मे वह सूर्य के समान होकर वर्धन क्रिया द्वारा शत्रु का प्रक्षालन (प्रक्षालन) करता है ।२१-२३। नृप ! इसके उपरांत पुष्पों से अर्घ्यपात्र को अलंकृत कर उसी द्वारा हृदय

एवं कृते शोधनं स्यात्पावकस्य न संशयः । पद्मगर्भे ततो वाथ हृदयाग्नौ समाक्षिपेत् ॥२
आवाहितो भवेद्देवदेवः साक्षान्न संशयः । ओंकारेणाहुतिशतं नेत्राञ्जनसमाधिना ॥३
पञ्चाहुतीस्ततो दद्यादङ्गानां प्रीतये नृप । विसर्जनं ततः कुर्याद्धृदयेन विचक्षणः ॥४

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरार्चनविधिवर्णनं
नाम त्रयोदशाधिकद्विशततमोऽध्यायः ।२१३।

# अथ चतुर्दशाधिकद्विशततमोऽध्यायः

## मरिचसप्तमीव्रतवर्णनम्

### सुमन्तुरुवाच

पद्मिनी च तथान्या तु मध्यमानामनी तथा । अर्किणी ज्वालिनी चैव तेजनी च गभस्तिनी ॥१
शङ्खमुद्रा च दशमी सूर्य वक्रा तथापरा । सहस्रकिरणा चैव मुद्रा द्वादश कीर्तिताः ॥२
दद्यादर्घ्यं तु पद्मिन्या व्योम बद्ध्वा जपेद्बुधः । उदयाश्रयः समाकर्षे मध्यमा व्याधिनाशिनी ॥३
अर्किण्या पश्यते सूर्यं विधिस्थस्तु भवेद्यदि । ज्वालिनीमुपसङ्गन्तुं बद्ध्वा सूर्यमुखो जपेत् ॥४
सप्ताहाद्वीक्षते सूर्यं सिध्यते च ततः स्वयम् । अवतीर्य पद्मखण्डं सूर्यादभिमुखो नरः ॥५

---

स्मरण करना चाहिए, जो सदैव रक्षक के रूप में रहता है । ऐसा करने से पावक का संशोधन हो जाता है, इसमें संदेह नहीं । पद्मगर्भित उस हृदय रूपी अग्नि में उस (प्रकार) का आक्षेप करना चाहिए । इसी भाँति देवाधिदेव सूर्य के आवाहन सुसम्पन्न होता है, इसमें संदेह नहीं । समाधिस्थ होकर ओंकार के उच्चारण पूर्वक का आहुति प्रदान करनी चाहिए । नृप ! इसके उपरांत

जपञ्छतसहस्त्रं हि अक्षयं लभते निधिम् । शङ्खमुद्रादिभिरिमं सूर्यचक्रविधिं शृणु ॥६
अहोरात्रोषितो भूत्वा बद्धवा सूर्यमुखो नरः । स्थितः पद्मासने राजञ्जपंश्चाप्ययुतं मनुम् ।७
पश्यते तु त्र्यहात्सूर्यं भवेत्सिद्धिश्च मानसी । सहस्त्रकिरणं बद्धवा नाभिमात्रजले स्थितः ॥८
जपेदयुतमात्रं तु भवेत्तद्गतमानसः । सहस्त्रकिरणं देवं परं रश्मिभिरावृतम् ॥९
स पश्यति परं धाम भवेत्सिद्धिश्च पुष्कला । शापानुग्रहकर्तासौ सर्वेषां प्राणिनां भवेत् ।१०
॥११
सर्वतः कञ्चुकं मुक्त्वा भवेद्वै विगतज्वरः
परौ गुल्फौ करौ कृत्वा संलग्नौ च परस्परम् । वामानामिकयाक्रम्य दक्षिणां तु कनीयसीम् ॥१२
वामा दक्षिणया चैव दक्षिणा वामया तथा । मुद्रैषा हि महापुण्या व्योममुद्रा प्रकीर्तिता ॥१३
बद्धया चानया सद्यो हीयन्ते व्याधयो नृणाम् । नानया रहितः कश्चित्सिद्धिं प्राप्नोति साधकः ॥१४
सर्वत्रैवोत्तमा ह्येषा मन्त्रमुष्टिरिति स्मृता । सूर्यस्य हृदयं सेयमर्कमुद्रेति विश्रुता ॥१५
बध्नीयात्सततं मन्त्रैरायुरारोग्यवृद्धये । सूर्यमण्डल अभ्यग्रे मन्त्री सूर्योदये स्थितः ॥१६
स सूर्याभिमुखो भूत्वा जपेन्मन्त्रं तु साधकः । दिनत्रयेण वीक्षेत ध्यानी जपपरायणः ॥१७
तं दृष्ट्वा नाश्नुते मृत्युं दुःखी न च न संशयः । प्राप्नोति च परं स्थानं यत्र देवो दिवाकरः ॥१८
उत्तानौ तु करौ कृत्वा पृष्ठलग्नौ परस्परम् । बद्धवा त्वङ्गुलयः सर्वाः सुप्रकीर्णा न संशयः ॥१९
आक्रम्य चाङ्गुलीमूलमङ्गुष्ठाभ्यां यथाक्रमम् । उदया नाम मुद्रैषा बध्नीयादुदये रवेः ॥२०

---

जप करने से मनुष्य को अक्षय निधि की प्राप्ति होती है । अब शंखमुद्रादि द्वारा किये जाने वाले उस दिन रात के विधान बता रहा हूँ । सुनो ।५-६। राजन् दिन रात के उपवास रह कर सूर्याभिमुख पद्मासन पर स्थित होकर दश सहस्र जप करने से मनुष्य को तीन दिन के भीतर सूर्य के दर्शन एवं मानसी सिद्धि प्राप्त होती है । नाभि तक जल में स्थित होकर 'सहस्रकिरण' मुद्रा के प्रयोग कर ध्यानमग्नावस्था में केवल दशसहस्र मंत्र के जप करने से सहस्र किरण (सूर्य) देव के, जो किरणों से आच्छन्न, उत्तम देव, तथा उत्तम

द्वादशाद्वीक्षते सूर्यं दिनात्स हि न संशयः । सर्वपापहरा चैव सर्वपापविनाशिनी ॥२१
उदया च विना कामं मध्यतश्चैव तं क्षिपेत् । मध्यमा नाम विख्याता मध्यसूर्ये तु चिन्तयेत् ॥२२
मध्यमा विधिना तेन बद्ध्वा मुद्रां तु साधकः । अङ्गुल्योः परमङ्गुष्ठौ विधिना तावुभौ ग्रथेत् ॥२३
मुद्रा सास्तमनी ह्येषा सर्वतन्त्रेश्वरी शुभा । सूर्यस्यास्तमने मुद्रां बध्द्वा जप्तं समारभेत् ॥२४
सहस्रं हि शतं वापि मुद्रां बद्ध्वा जपेद्बुधः । सर्वपातकसंमुक्तः सप्ताहादनुशोभनम् ॥२५
करौ परस्परं लग्नावङ्गुष्ठौ चोर्ध्वसंस्थितौ । उभौ चाङ्गुष्ठकौ चोर्ध्वौ संलग्नौ मूर्ध्नि संस्थितौ ॥२६
मुद्रा न मालिनी चैव निर्दहेत्पापपञ्जरम् । ब्रह्महत्यादि यत्पापं योजिता सा तु मूर्धनि ॥२७
विदर्भ्याङ्गुलयः सर्वा इषन्मध्यस्तथाग्रतः । ऊर्ध्वस्थितौ तथाङ्गुष्ठौ मुद्रेयं तर्जनी स्मृता ॥२८
सर्वव्याधिहरा देवी सर्वशत्रुविनाशिनी । एतां बध्द्वा महापुण्यां सर्वान्स्तम्भयते रिपून् ॥२९
उभौ प्रसार्य वै हस्तौ मध्ये सार्धेन संस्थितौ । शेषानाम्या ततश्चैव अङ्गुष्ठाग्रं तथा क्रमात् ॥३०
मुद्रा गभस्तिनी नाम सूर्यस्य हृदयं परम् । मृत्युं नाशयते ह्येषा बद्ध्वा सूर्योदये शुभा ॥३१
अर्घ्यकाले तु बध्नीयादर्चयाग्निं प्रपूजयेत् । जपकाले च बध्नीयान्मन्त्राणां नात्र संशयः ॥३२
विदक्षिणकनिष्ठिक्यां तर्जनीभ्यां तथा भवेत् । तर्जनीभ्यां तथाङ्गुष्ठौ संलग्नौ तु परस्परम् ॥
जपं यः कुरुते नित्यं त्रिभिर्मासैर्विशुद्ध्यति ॥३३

---

करने से बारह दिन के भीतर सूर्य के दर्शन प्राप्त होते हैं, इसमें संदेह नहीं और यही समस्त पापोंके नाश करती है ।२१। उदया मुद्रा किसी भी प्रकार की हीनता से रहित है । मध्यकाल से जिसे सूर्य के प्रति प्रयुक्त किया जाता है वह मध्यमा नाम से प्रसिद्ध है । सूर्य के मध्याह्न का लीन होने पर उसका चिन्तन करना चाहिए । विधिपूर्वक मध्यमा मुद्रा को धारण करके साधक अपने दोनों अँगूठो को अंगूलियों के

करौ तु सम्पुटौ कृत्वा तर्जन्यौ द्वे च कुञ्चयेत् ॥३४
सहस्रकिरणा ह्येषा सर्वमुद्रेश्वरेश्वरी । त्रिसन्ध्यमेतां बध्नीयात्साधको मन्त्रमूर्धनि ॥
नाशयेत्सर्वपापानि तमोराशिमिवांशुमान् ॥३५
मुद्रा मुद्रककुम्भेति बद्ध्वा पश्चाच्च मन्त्रयेत् । मासेन नाशयेत्कुष्ठं त्रिभिर्मासैर्न संशयः ॥
इति मुद्राङ्गसहितं सूर्यं पूजयते तु यः ॥३६
अनेन विधिना राजन्ब्रह्मा पूजयते रविम् । तस्मात्त्वमपि राजेन्द्र पूजयानेन भास्करम् ॥३७
ततः सूर्यमवाप्येह सूर्यलोकं स गच्छति । अनेन विधिना यस्तु पूजयेत्सततं रविम् ॥३८
स याति परमं स्थानं यत्र देवो दिवाकरः । इत्थं पूज्य च देवेशमनेन विधिना नृप ॥३९
भोजयित्वा यथाशक्ति ब्राह्मणांश्च विधानतः । सप्तम्यां प्राशयेद्वापि मरिचं मन्त्रतस्तथा ॥४०
एकं गृहीत्वा मरिचमव्रणं च दृढं परम् । सजलं प्राशयेद्राजन्मन्त्रेणानेन वा स्मृतम् ॥४१
यथोक्तेन विधानेन पूजयित्वा दिवाकरम् । इति सम्प्राप्य मरिचं ततो भुञ्जीत वाग्यतः ॥४२
प्रियसङ्गमवाप्नोति तत्क्षणादेव नान्यथा । इतीयं सप्तमी पुण्या प्रियसङ्गमदायिनी ॥४३
कुर्यादिकेन कामांस्तु वत्सरेण स गच्छति । पुत्रादिभिर्नरश्रेष्ठ पुनः सङ्गममृच्छति ॥४४
कुरु तस्मान्महाबाहो त्वमेव प्रियदायिनीम् । उपोष्य इन्द्रो विधिवत्सुरामरिचसप्तमीम् ॥४५
संयोगं कृतवान्वीर सह शच्या विधानतः । उपोष्यैनां नलश्चापि दमयन्त्या महाबलः ॥४६

---

दोनों हाथों के संपुटित करके दोनो तर्जनियों को आकुञ्चित (टेढी) करने से 'सहस्र किरण' नामक मुद्रा होती है जो समस्त मुद्राओं में प्रधान मुद्रा बतायी जाती है तीनों संध्या समय उस मुद्रा के प्रयोग करने से

रामोऽगात्सीतया सार्धमुपोष्यैनां नराधिप ॥४७

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे मरिचसप्तमीव्रतवर्णनं नाम चतुर्दशाधिकद्विशततमोऽध्यायः ।२१४।

# अथ पञ्चदशाधिकद्विशततमोऽध्यायः

## सूर्यमन्त्रोद्धारवर्णनम्

### सुमन्तुरुवाच

तृतीयां सप्तमीं वीर शृणुष्व गदतो मम । निम्बपत्रैः स्मृता या तु परमा रोगनाशिनी ॥१
यथार्चनविधिर्वान्यो येन पूजयते रविम् । देवदेवः शार्ङ्गपाणिः शङ्खचक्रगदाधरः ॥२
अथार्चनविधिं वच्मि मन्त्रोद्धारं निबोध मे ॥३

ॐ खषोल्काय नमः । मूलमन्त्रः । ॐ विटि २ शिरः । ॐ सहस्ररश्मये अस्त्रम् । ॐ सहस्रकिरणाय २०० ऊर्ध्वबन्धः । ॐ घनाय भूतभाविने नमः इति भूतबन्धः । ॐ ज्वल २ प्रज्वल २ अग्निप्रकर ॥४
ॐ आदित्याय विद्महे विश्वभागाय धीमहि । तन्नः सूर्यः प्रचोदयात् ॥५
॥ गायत्रीसङ्कलीकरणमिदम् ॥ ॐ धर्मात्मने नमः ऐशान्याम् । ॐ दक्षिणाय नमः आग्नेय्याम् । ॐ वज्रपाणयेऽनन्ताय नमः उत्तरतः । ॐ श्यामपिङ्गलाय नमः ऐशान्याम् । ॐ अमृताय नमः आग्नेय्याम् । ॐ बुधाय सोमसुताय नमो दक्षिणतः । ॐ वागीश्वर सर्वविद्याधिपतये नैर्ऋत्याम् । ॐ शुक्राय

महर्षये भूताय पश्चिमतः। ॐ ईश्वराय सूर्यात्मने वायव्याम्। ॐ कृतवते नमः उत्तरतः। ॐ राहवे नमः ऐशान्याम्। ॐ अन्तराय सूर्यात्मने नमः पूर्वतः। ॐ ध्रुवाय नमः ऐशान्याम्। ॐ अन्तराय सूर्यात्मने नमः पूर्वतः। ॐ ध्रुवाय नमः ऐशान्याम्। ॐ भगवते पूषन्मालिन्सकलजगत्पते सप्ताश्ववाहन भूभुज परमसिद्धिशिरसि गतं गतं गृह्ण तेजोऽग्ररूप अनंतज्वाल २।

### आवाहनमन्त्रः

ॐ नमो भगवते आदित्याय सहस्रकिरणाय यथासुखं पुनरागमनाय इति ॥६

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तीमीकल्पे सौरधर्मे सूर्यमन्त्रोद्धारवर्णनं नाम पञ्चदशाधिकद्विशततमोऽध्यायः।१२५।

# अथ षोडशाधिकद्विशततमोऽध्यायः

## पुराणश्रवणविधिवर्णनम्

### सुमन्तुरुवाच

भृणुष्वर्चाविधिं राजन्मन्त्रपूतेन वारिणा। प्रोक्षणीयं प्रयत्नेन किमर्थं सुसमाहितः ॥१
हृदयादिष्वथाङ्गेषु मन्त्रं विन्यस्य मन्त्रवित्। आत्मानं भास्करं ध्यात्वा परिचारसमन्वितः ॥२
कुर्यात्सम्मार्जनीं मुद्रां दिशां च प्रतिबोधनम्। पाताले भूशोधनं चैव नभसश्च तथा मतम् ॥३
अर्चनस्य प्रकारोऽयं सर्वेषामीप्सितप्रदः। सर्वैरपि बुधैर्वीर पद्यमेतत्प्रकीर्तितम् ॥४

---

ईश्वर, के उत्तर में कृतवान् के, ईशान में राहु के, पूर्व में अन्तरात्मा सूर्य के, ईशान में ध्रुव के, तथा ओं

अष्टपत्रं लिखेत्पद्मं शुचौ देशे सकर्णिकम् । आवाहनीं ततो बद्ध्वा मुद्रामावाहयेद्रविम् ॥५
खषोल्कं स्नापयेत्तत्र स्वरूपं लोभदायकम् । स्थापयेत्स्नापयेच्चैव मन्त्रैर्मन्त्रशरीरिणम् ॥६
आग्नेय्यां दिशि देवस्य हृदयं स्थापयेन्नरः । ऐशान्यां तु शिरः स्थाप्य नैर्ऋत्यां विन्यसेच्छिखाम् ॥७
पौरन्दर्यां न्यसेन्नेत्रे एकाग्रहृदयस्तु सः । आवाह्य चैकं कवचं वारुण्यामस्त्रमेव ॥८
ऐशान्यां स्थापयेत्सोमं पौरन्दर्यां तु लोहितम् । आग्नेय्यां सोमतपनं याम्यां चैव बृहस्पतिम् ॥९
नैर्ऋत्यां [1]दानवं शुक्रं वारुण्याञ्च शनैश्चरम् । वायव्यां तथा केतुं कौबेर्यां राहुमेव च ॥१०
द्वितीयायां तु कक्षायां देवतेजः समुद्भवान् । स्थापयेद्द्वादशादित्यान्काश्यपेयान्महाबलान् ॥११
भगः सूर्योऽर्यमश्चैव मित्रो वरुण एव च । सविता चैव धाता च विवस्वांश्च महाबलः ॥१२
त्वष्टा पूषा तथा चेन्द्रो द्वादशो विष्णुरुच्यते । पूर्वे चेन्द्राय दक्षिणे यमाय पश्चिमे वरुणाय उत्तरे
कुबेराय ऐशान्यामीश्वराय आग्नेय्यामग्निदेवतायै नैर्ऋत्यां पितृदेवेभ्यो वायव्यां वायवे ॥
जया च विजया चैव जयन्ती चापराजिता । शेषश्च वासुकिश्चैव रेवती च विनायकः ॥
महाश्वेता महादेवी राज्ञी चैव सुवर्चला ॥१३
तथान्यो वापि देवानां समूहस्तत्र तत्र ह । तथान्यो लोकविख्यातो योगः प्रोक्तश्च दक्षिणे ॥१४
पुरस्ताद्भासुरस्थाने स्थापनीया विजानता । सिद्धिर्वृद्धिः स्मृतिर्देवी श्रीश्चैवोत्पलमालिनी ॥१५
स्थाप्या स्वदक्षिणे पार्श्वे लोकपूज्या समन्ततः । प्रज्ञावती क्षुधा वीर हारीता बुद्धिरेव च ॥१६

---

पवित्र प्रदेश में अष्टदल कमल की रचना करे जिसमें सौन्दर्य कर्णिका निर्मित की गई हो । पश्चात् उसमें आवाहनीय मुद्रा के प्रयोग द्वारा सूर्य का आवाहन करना चाहिए । सूर्य के खषोल्क स्वरूप का जिसमें अधिक लोभ-लाभ निहित है, मंत्र रूपी सम्पन्न शरीर का मंत्र पूर्वक स्थापन एवं स्नान सुसम्पन्न

स्थाप्य बुद्धिमती नित्यं श्रीकार्मैर्वा विवस्वतः । ऋद्धिश्चैव विसृष्टिश्च पौर्णमासी विभावरी ॥
स्थाप्याश्च स्वोत्तरे पार्श्वे इत्येता देवशक्तयः ॥१७
दीपश्चान्नमलङ्कारो वासः पुष्पाणि मन्त्रतः । देयानि देवदेवाय सानुगाय समूर्तये ॥१८
विधिनानेन सततं सदा योऽर्चयति भास्करम् । सम्प्राप्य परमान्कामान्ततो भानुसदो व्रजेत् ॥१९
अनेन विधिना यस्तु भोजयेद्भास्करं नृप । त्वं निम्बकटुकात्मासि आदित्यनिलयस्तथा ॥
सर्वरोगहरः शान्तो भव मे प्राशनं सदा ॥२०
इत्थं प्राश्य जपेद् भूमौ देवस्य पुरतो नृप । ब्राह्मणान्भोजयित्वा तु शक्त्या दत्त्वा तु दक्षिणाम् ॥२१
भुञ्जीत वाग्यतः पश्चान्मधुरं क्षारवर्जितम् । इत्येषा वर्षपर्यन्तं कर्तव्या चैव सप्तमी ॥२२
कुर्वाणः सप्तमीमेतां सर्वरोगैः प्रमुच्यते । सर्वरोगविनिर्मुक्तः सूर्यलोकं स गच्छति ॥२३

## सुमन्तुरुवाच

अथ भाद्रपदे मासि सिते पक्षे महीपते । कृत्वोपवासं सप्तम्यां विधिवत्पूजयेद्रविम् ॥२४
माहेश्वरेण विधिना पूजयेदत्र भास्करम् । अष्टम्यां तु पुनः स्नातः पूजयित्वा दिवाकरम् ॥२५
दद्यात्फलानि विप्रेभ्यो मार्तण्डः प्रीयतामिति । खर्जूरं नारिकेलं च मातुलिङ्गफलानि च ॥२६
देवस्य पुरतो दत्त्वा तथा चाम्रफलानि च । इति ते कथितं राजन्सप्तमीफलमादितः ॥२७
महातपो महाश्रेष्ठं भास्करस्य विशाम्पते । यच्छ्रुत्वा मानवो राजन्मुच्यते ब्रह्महत्यया ।२८

---

नित्य करनी चाहिए । ऋद्धि, विसृष्टि, पौर्णमासी, विभावरी, इन देव शक्तियों की प्रतिष्ठा उनके उत्तर पार्श्व में करनी चाहिए ।११-१७। मंत्रोच्चारण पूर्वक दीप, अन्न, आभूषण, वस्त्र, और पुष्पों को

तथेदं परमं पर्व कथितं ब्रह्मसंज्ञितम् । यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते मानवा नृप ॥२९
अश्वमेधसहस्रस्य वाजपेयशतस्य च । सर्वतीर्थाभिगमने वेदाभ्यासे च यत्फलम् ॥
यत्फलं पृथिवीदाने तत्सर्वं प्राप्नुयान्नरः ॥३०
राजसूयसहस्रस्य वाजपेयशतस्य च । सहस्रशतदानस्य फलं विन्दति मानवः ॥३१
लेखत्वं ब्राह्मणो गच्छेत्क्षत्रियो विप्रतां व्रजेत् । वैश्योऽपि क्षत्रतां याति शूद्रो वैश्यत्वमेव च ॥३२
सूतमागधबन्द्याद्या ये चान्ये सङ्करोद्भवाः । तेऽपि यान्त्युत्तमं स्थानं पुराणश्रवणाद्विभो ॥३३
इतिहासपुराणाभ्यां नत्वन्यत्पावनं नृणाम् । येषां श्रवणमात्रेण मुच्यते सर्वकिल्बिषैः ॥३४
विधिना राजशार्दूल शृण्वतां यत्फलं किल । यथोक्तं नात्र सन्देहः पठतां च विशांपते ॥३५

## शतानीक उवाच

भगवन्केन विधिना श्रोतव्यं भारतं नरैः । चरितं रामभद्रस्य पुराणानि विशेषतः ॥३६
कथं तु वैष्णवा धर्माः शिवधर्मा अशेषतः । सौराणां चापि विप्रेन्द्र उच्यतां श्रवणे विधिः ॥३७
वाचनीयं कथं चापि वाचको द्विजसत्तम । लक्षणं चास्य मे ब्रूहि वाचकस्य महात्मनः ॥३८
स्वरूपं चैव मे ब्रूहि खषोल्कस्य महात्मनः । फलं च पूजिते किं स्याद्वाचके विधिवद्द्विज ॥३९
पारणेपारणे पूज्यो वाचकः श्रावकैः कथम् । समाप्ते भगवन्किंकिं देयं पर्वणि वाचके ॥
न च किं कार्यसिद्धं यत्सिद्धं पर्वणि पर्वणि ॥४०

---

नृप ! इस प्रकार के समस्त पाप नष्ट हो जाते हैं । सहस्र अश्वमेध, सौ वाजपेय, समस्त तीर्थों की यात्रा, वेदाध्ययन, पृथिवी दान, सहस्र राजसूय, सौ वाजपेय, सौ सहस्र के दान, इनके समस्त फलों की प्राप्ति मनुष्य को पुराण श्रवण मात्र से होती है, तथा विभो ! उसके सुनने मात्र से ही ब्राह्मण देवत्व, क्षत्रिय

## सुमन्तुरुवाच

सम्यक्पृष्टोऽस्मि राजेन्द्र इतिहासपुराणयोः ॥४१
श्रवणे तु महाबाहो श्रूयतां यन्मया पुरा । पृष्टो वोचन्महातेजा विरिञ्चो भगवान्गुरुः ॥४२
हन्त ते कथयाम्येष पुराणश्रवणे विधिम् । इतिहासपुराणानि श्रुत्वा भक्त्या विशेषतः ॥
मुच्यते सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥४३
सायं प्रातस्तथा रात्रौ शुचिर्भूत्वा शृणोति यः । तस्य विष्णुस्तथा ब्रह्मा तुष्यते शङ्करस्तथा ॥४४
प्रत्यूषे भगवान्ब्रह्मा दिनान्ते तुष्यते हरिः । महादेवस्तथा रात्रौ शृण्वतां तुष्यते विभुः ॥
पारणानि दशाहेषु एके कुर्वन्ति तानि भोः ॥४५
भवेद्वै राजशार्दूल शृणु तेषां च यत्फलम् । विधानं वाचकस्येह शृण्वतां च विशांपते ॥४६
शुद्धवासा गृहादेत्य स्थानं यत्समयान्वितम् । प्रदक्षिणं ततो गत्वा यस्तस्मिन्देव एव हि ॥४७
नात्युच्चं नातिनीचं च ह्यासनं भजते ततः । आसनं तस्य वै राजन्बोधकस्य सदा भवेत् ॥४८
वन्दनीयं प्रपूज्यं च श्रोतृभिः कुरुनन्दन । व्यासपीठं तु तत्प्रोक्तं गुरोरासनमादिशेत् ॥४९
न स्थेयं श्रावकैस्तस्माद्वाचकस्यासने नृप । राजासने यथा भृत्यैर्यथा पुत्रैः पितुर्नृप ॥५०
यथा शिशुर्गुरोर्वीर स तेषां हि गुरुर्मतः । देवार्चामग्रतः कृत्वा ब्राह्मणार्चां विशेषतः ॥५१
उपविश्य ततः पश्चाच्छ्रावकः शृणुयान्नृप । समस्तानागतान्कृत्वा ततः पुस्तकमाददेत् ॥५२

---

**सुमन्तु बोले**—राजेन्द्र ! आप ने अत्युत्तम प्रश्न किया है, महाबाहो ! पहले समय में इतिहास एवं पुराण के सुनने के विषय में पूँछने पर महातेजस्वी भगवान् गुरु ब्रह्मा ने जो कुछ बताया था, मैं उसी पुराण-श्रवण के विधान को बता रहा हूँ, (सुनो) ! विभो ! भक्ति पूर्वक इतिहास एवं पुराणों के श्रवण

प्रणम्य[1] शिरसा तस्य पुस्तकस्य विशांपते । ग्रन्थिं च शिथिलां कुर्याद्वाचकः कुरुनन्दन ॥
पुनर्बध्नीत तत्सूत्रं तन्मुक्त्वा वाचयेत्क्वचित् ॥५३
त्रिविधं पुस्तकं विद्यात्सूत्रं वासुकिरुच्यते । पत्राणि भगवान्ब्रह्मा अक्षराणि जनार्दनः ॥५४
शङ्करश्च तथा सूत्रं पङ्क्तयः सर्वदेवताः । पावकश्च तथा सूत्रे मध्ये भानुः समाश्रितः ॥५५
अग्रे स्थिता ग्रहाः सर्वे दिशो वापि तथा विभो । स्मृतः मेरुः सदा शङ्कुश्छिद्रमाकाशमुच्यते ॥५६
यंत्रद्वयं काष्ठमयमधोर्ध्वं यदुदाहृतम् । द्यावापृथिव्योश्च शङ्खस्तथा चन्द्र उदाहृतः ॥५७
इत्थं देवमयं ह्येतत्पुस्तकं देवपूजितम् । नमस्यं पूजनीयञ्च गृहे स्थाप्य विभूतये ॥५८
योऽस्य सूत्रं बृहत्कृत्वा प्रयच्छति नरोत्तमः । स याति परमं स्थानं यत्र देवो दिवाकरः ॥५९
निरूप्य पात्रं राजेन्द्र कराभ्यां गृह्य वाचकः । प्रणम्य शिरसा सर्वान्ब्रह्मादीन्व्यासमेव च ॥
वाल्मीकिं च तथा राजन्विधिं विष्णुं शिवं रविम् ॥६०
नमस्कारमथैषां तु पठित्वा कुरुनन्दन । ततोऽसौ व्याहरेद्विप्रान्वाचकः[2] श्रद्धयान्वितः ॥६१
अलम्बितमतस्तब्धमद्भुतं वीरमूर्जितम् । असंसक्ताक्षरपदं रसभावसमन्वितम् ॥६२
सप्तस्वरसमायुक्तं कालाकाले विशांपते । प्रदर्शयन्रसान्सर्वान्वाचको व्याहरेन्नृप ॥६३

---

बताया गया है । तदुपरात कुरुनन्दन ! उसके बंधनों को शिथिल कर उसे बन्धन मुक्त कर शेष जिस अध्याय के आराधन उस दिन न करना हो, उन्हें उन्हीं बंधनों से बाँधकर सुप्रतिष्ठित कर दे, क्योंकि उसके पारायण उस दिन न होकर दूसरे दिन होंगे ।५१-५३। पुस्तकों का तीन प्रकार का स्वरूप बताया गया है बन्धन वासुकी, उसके पत्र (पन्ने) भगवान् ब्रह्मा, एवं अक्षरगण जनार्दन देव के रूप हैं—सूर्य शंकर, पंक्तियाँ समस्त देवता, सूत्र में पावक एवं मध्य में सूर्य प्रतिष्ठित हैं ।५४-५५। विभो ! (उनके) अग्रभाग में समस्त ग्रह, दिशाएँ, शंकु मेरुपर्वत, काष्ठ की दोनों पट्टियों पर (देवता), जो नीचे ऊपर स्थित रहती

इतिहासपुराणानि रामस्य चरितं तथा ॥६४
ईदृशाद्वाचकाद्विप्राच्छ्रुत्वा श्रद्धासमन्वितः । ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चापि विशेषतः ॥६५
नियमस्थः शुचिः श्रोता शृणुयात्फलमश्नुते । रोगैश्च मुच्यते सर्वैर्महत्पुण्यं च विन्दति ॥
अश्वमेधमवाप्नोति सर्वान्कामानवाप्नुते ।
॥६६
गच्छेद्वापि परं स्थानं देवस्याद्भुतमुत्तमम्
स्नातैर्गृहं समागम्य श्रोतृभिर्वाचकस्य तु । प्रणम्य शिरसा विप्रं वाचकं श्रद्धया नृप ॥६७
आसनं च समाश्रित्य स्थातव्यं[1] वाचकस्य तु । सम्मुखं राजशार्दूल वाग्यतैः सुसमाहितैः ॥६८
वाचकेन नमस्कारे कृते व्यासस्य भूपते । न वक्तव्यं महाबाहो श्रावकैः संशयादृते ॥६९
संशये सति प्रष्टव्यो वाचकः सम्प्रसाद्य तु । यतश्च स गुरुस्तेषां धर्मतो बन्धुरुच्यते ॥७०
वाचकेनापि वक्तव्यं यस्मात्तेषां निबोधनम् । अनुग्रहाय सर्वेषामशेषा गुरवो नृप ॥७१
नमस्कारादयः श्राव्याः शिवमस्त्विति वोद्यतैः । वाग्यतैर्नृपशार्दूल वर्णैः सर्वैर्महीपते ॥७२
शूद्राणां पुरतो वैश्या वैश्यानां क्षत्रिणस्तथा । मध्यस्थितोऽथ सर्वेषां वाचको व्याहरेन्नृप ॥
॥७३
ये च सङ्करजा राजन्नरास्ते शूद्रपृष्ठतः
ब्राह्मणं वाचकं विद्वान्नान्यवर्णजमादरेत् । श्रुत्वान्यवर्णजाद्वाचं वाचकान्नरकं व्रजेत् ॥७४
इत्थं हि शृण्वतां तेषां वर्णानामनुपूर्वशः । मासि मासि भवेद्राजन्पारणं कुरुनन्दन ॥७५

---

पारायण या कथा कहनी चाहिए ।६२-६३। श्रद्धा सम्पन्न होकर ऐसे वाचक ब्राह्मणों द्वारा इतिहास, पुराण एवं रामचरित के श्रवण करने से उस पवित्रतापूर्ण एवं नियम पालक श्रोता को फल की प्राप्ति होती है । ब्राह्मण, क्षत्रिय, वैश्य, विशेषकर शूद्र को अश्वमेध के फल, समस्त कामनाओं की सफलता, ... रोगों से मुक्ति एवं महान पुण्य की प्राप्ति पूर्वक सूर्य देव के उस अद्भुत एवं उत्तम स्थान की प्राप्ति

श्रेयोऽर्थमात्मनो राजन्पूजयेद्वाचकं बुधः । मासि पूर्णे द्विजश्रेष्ठे दातव्यं स्वर्णमाषकम् ॥७६
ब्राह्मणेन महाबाहो द्वे देये क्षत्रियस्य तु । वाचकाय द्विजश्रेष्ठ वैश्येनापि त्रयं तथा ॥७७
शूद्रेणैव च चत्वारो दातव्याः स्वर्णमाषकाः । मासि मासि द्विजश्रेष्ठ श्रद्धया वाचकाय तु ॥७८
प्रथमे पारणे राजन्वाचकं पूज्य शक्तितः । अग्निष्टोमस्य यज्ञस्य फलं विन्दति मानवः ॥७९
कार्तिकादीन्समारभ्य यावत्कार्त्तिकमच्युत[1] । अग्निष्टोमं गोसवं च ज्योतिष्टोमं तथा नृप ॥८०
सौत्रामणिं वाजपेयं वैष्णवं च तथा विभो । माहेश्वरं तथा ब्राह्मं पुण्डरीकं यजेत यः ॥८१
आदित्ययज्ञस्य तथा राजसूयाश्वमेधयोः । फलं प्राप्नोति राजेन्द्र मासैर्द्वादशभिः क्रमात् ॥
इत्थं यज्ञफलं प्राप्य याति लोकांस्तथोत्तमान् ॥८२
वज्रवेदिकसम्पन्नं मणिरत्नविभूषितम् । विमानमास्थितो राजन्मोदते शक्रमन्दिरे ॥८३
ततश्चन्द्रस्य भवने वारुणे भवने ततः । शोचिष्केशगृहे गत्वा गच्छेच्चैलबिले गृहे ॥८४
धिषणस्य गृहं गत्वा ततश्चित्रशिखण्डिनः । वृद्धश्रवसमासाद्य गच्छेत्कञ्जजमन्दिरे ॥
एवमेव नृपश्रेष्ठ नात्र कार्या विचारणा ॥८५
फलमेतत्समुद्दिष्टं शृण्वतां सततं नृणाम् । एतत्फलं वत्सरेण शृण्वतो विधितो नृप ॥८६
एतानि परिमाणानि वत्सरेण भवन्ति वै । शृण्वतां नृपशार्दूल ददतां वाचकाय वै ॥८७

---

विद्वान् को चाहिए कि आत्म कल्याणार्थ वाचक की पूजा करें। और महाबाहो ! मास की समाप्ति में उस ब्राह्मण श्रेष्ठ (वाचक) को ब्राह्मणों द्वारा एक माशा, क्षत्रियों द्वारा दो, वैश्यों द्वारा तीन एवं द्विजश्रेष्ठ ! शूद्रों द्वारा चार माशे सुवर्ण प्राप्त होने चाहिए। द्विजश्रेष्ठ ! श्रद्धा सम्पन्न होकर प्रत्येक मास में चारों वर्णों को ऐसी ही दक्षिणा वाचक के लिए प्रदान करनी चाहिए।७६-७८। राजन् ! प्रथम

एकं च द्वे तथा त्रीणि चत्वारि च विशांपते । देयानि वाचकायेह मासि मासि नराधिप ॥८८
ब्राह्मणाद्यैर्नृपश्रेष्ठ सर्ववर्णविभागशः । समाप्ते पर्वणि तथा वाचकं पूजयेत्पुनः ॥८९
वाचकं ब्राह्मणं चैव सर्वकामैः प्रपूजयेत् । गन्धमाल्यादिभिर्दिव्यैर्वासोभिर्विविधैरपि ॥९०
वाचकाय प्रदत्त्वा तु ततो विप्रान्प्रपूजयेत् । हिरण्यं रजतं रुक्मं गाश्च कांस्योपदोहनाः ॥९१
दत्त्वा च वाचकायेह श्रुतस्य प्राप्यते फलम् । यथा सदक्षिणं चान्नं श्राद्धकाले प्रकीर्तितम् ॥
तथा श्रुतं नृपश्रेष्ठा सदक्षिणमुदाहृतम् ॥९२
वाचकं पूजयेद्यस्मात्पश्चाल्लेखकपूजनम् । समाप्ते पर्वणि विभो विशेषेणैव चार्चयेत् ॥९३
वाचकः पूजितो येन पूजितास्तेन देवताः । वाचके परितुष्टे च मम प्रीतिरनुत्तमा ॥९४
इति वेधाः सदा प्राह देवानां पुरतः पुरा । तस्मिंस्तुष्टे जगत्सर्वं तुष्टं भवति नित्यशः ॥९५
तस्मात्प्रपूजयेद्विप्रं वाचकं नृपसत्तम । न तुल्यं वाचकेनेह पात्रं दानस्य विद्यते ॥९६
तिष्ठंति यस्य शस्त्राणि जिह्वाग्रे पृथिवीपते । दृष्टश्च गोचरस्तात कस्तेन सदृशो द्विजः ॥९७
न तुल्यं विद्यते तेन भुवि पात्रं नरेषु वै । तस्मादन्नं सदा पूर्वं तस्मै देयं विदुर्बुधाः ॥
श्राद्धे यस्य द्विजो भुङ्क्ते वाचकः श्रद्धयान्वितः । भवन्ति पितरस्तस्य तृप्ता वर्षशतं नृप ॥९८

---

प्रदान करने चाहिए । नराधिप ! प्रत्येक मास में वाचक के लिए श्रोताओं को ऐसा ही करने का विधान बताया गया है ।८८। नृपश्रेष्ठ ! ब्राह्मणादि सभी वर्ण को क्रमशः पर्व की समाप्ति में भी पुनः उसी भाँति वाचक की पूजा करनी चाहिए ।८९। समस्त कामनाओं की पूर्ति के लिए दिव्य एवं गन्ध मालाओं आदि द्वारा अनेक भाँति से वाचक ब्राह्मण की पूर्व भाँति ही पूजा करना बताया गया है ।९०। वाचक की पूजा एवं दक्षिणा दान के उपरांत ब्राह्मणों की पूजा करनी चाहिए और सुवर्ण चाँदी, रुक्म तथा कांसे की दोहनी

यथेह सर्वदेवानां भास्करः प्रवरः स्मृतः । विस्पष्टमद्भुतं शान्तं स्पष्टाक्षरपदं तथा ॥
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥९९
बुध्यमानः सदात्यर्थं ग्रन्थार्थं कृत्स्नशः नृप । ब्राह्मणादिषु वर्णेषु ग्रन्थार्थं वाचयेन्नृप ॥१००
य एवं वाचयेद्राजन्स विप्रो व्यास उच्यते । अतोऽन्यथा कथयिता ज्ञेयोऽसौ वक्तृनामकः ॥१०१
इत्थंभूतो वसेद्यस्मिन्वाचको व्याससन्निभः । देशेऽथ पत्तने राजन्स देशः प्रवरः स्मृतः ॥१०२
ते धन्यास्ते महात्मानस्ते कृतार्था न संशयः । वसन्ति यत्नतो यस्मिन्स देशः प्रवरः स्मृतः ॥१०३
न शोभते पुरं वीर व्यासहीनं कदाचन । यथार्कहीनं हि दिनं चन्द्रहीना यथा निशा ॥१०४
न राजते सरो यद्वत्पद्मिनी रहितं नृप । तथा व्यासविहीनं तु राजते न पुरं क्वचित् ॥१०५
प्रणम्य वाचकं भक्त्या यत्फलं प्राप्यते नरैः । न तत्क्रतुसहस्रेण प्राप्यते कुरुनन्दन ॥१०६
यथैकतो ग्रहाः सर्वे एकतस्तु दिवाकरः । तथैकतो द्विजाः सर्वे एकतस्तु स वाचकः ॥१०७
यथा वेदसमो नास्ति आगमो भुवि कश्चन । तथा व्याससमो नास्ति ब्राह्मणो भुवि कश्चन ॥१०८
कुरुक्षेत्रसमं तीर्थं न द्वितीयं प्रचक्षते । न नदी गङ्गया तुल्या न देवो भास्करात्परः ॥१०९
नाऽश्वमेधसमं पुण्यं न पापं ब्रह्महत्यया । पुत्रजन्ममुखैस्तुल्यं न सुखं विद्यते यथा ॥११०

---

श्राद्ध के दिन श्रद्धालु होकर कोई वाचक ब्राह्मण भोजन करता है, उसी समय उसके पितर लोग सौ वर्ष के लिए तृप्त हो जाते है ।९८। जिस प्रकार समस्त देवताओं में भास्कर सर्वश्रेष्ठ बताये गये हैं, उसी भाँति ब्राह्मण वाचक जो अत्यन्त स्पष्ट, अद्भुत, शांत, स्पष्ट अक्षर एवं कलस्वर का स्पष्ट उच्चारण करने वाले, मधुर स्वर तथा इस भावपूर्ण उस ग्रंथ के विशद अर्थों को सदैव ही भली भाँति समझता है, सर्वप्रधान कहा गया है। नृप ! ब्राह्मण आदि सभी वर्णों को ...

तथा व्याससमो विप्रो न क्वचित्प्राप्यते नृप । दैवकर्मणि पित्र्ये च पावनः परमो नृणाम् ॥१११
नास्ति व्याससमः श्रेष्ठ इतीयं वैदिकी श्रुतिः । अथ विप्रसहस्राणां विप्रोऽयं श्रेष्ठ ईरितः ॥
॥११२
उपविष्टो यदा भुङ्क्तो व्यासो वै विप्रमण्डले
श्राद्धे तात पवित्राणि कथितानि पुरा मम । ब्रह्मणा राजशार्दूल शृणु तानि यथाविधि ॥११३
मधु पायसं कालशाकस्तिलाश्च कुतपस्तथा । राजतं चापि पात्रेषु ब्राह्मणेष्वथ वाचकः ॥११४
दैवकर्मणि पित्र्ये च स ज्ञेयः पङ्क्तिपावनः । वाचकश्च यतिश्चैव तथा यश्च षडंगवित् ॥११५
एते सर्वे नृपश्रेष्ठ विज्ञेयाः पङ्क्तिपावनाः । नामनी वाचकस्यैते शृणुष्वार्थमथैतयोः ॥११६
इतिहासपुराणानि जयेति विदितानि वै । उपजीवति यस्माद्वै वाचयानो द्विजो नृप ॥
॥११७
जयोपजीवी तेनासौ गतः ख्यातिं तु वाचकः
विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरमिदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् ॥११८
बुध्यमानोथवात्यर्थं ग्रन्थार्थं कृत्स्नशो नृप । ब्राह्मणादिषु वर्णेषु ग्रन्थार्थं चार्पयेत्तथा ॥११९
य एवं च वाचयेद्राजन्स विप्रो व्यास उच्यते । अतोऽन्यथा वाचयिता न गच्छेद्व्यासतां क्वचित् ॥१२०
त्रिविधं वाचकं विद्यात्सदा गुणविभेदतः । श्रावकं च महाबाहो त्रिविधं गुणभेदतः ॥१२१
द्वावेतौ कथ्यमानौ तु निबोध गदतो मम । अभिद्रुतं तथास्पष्टं विस्तरं स्वरवर्जितम् ॥१२२

---

अप्राप्य है । देव तथा पितृकर्मों में उनके समान पवित्र अन्य कोई मनुष्य नहीं होता है, क्योंकि यह परम्परागत प्रसिद्धि एवं वैदिक जनश्रुति है कि व्यास के समान अन्य कोई मनुष्य श्रेष्ठ नहीं है । सहस्रों ब्राह्मणों में यह (व्यास) ब्राह्मण सर्वश्रेष्ठ बताया गया है । तात ! श्राद्ध के दिन ब्राह्मण या मंडली के

पदच्छेदविहीनं च तथा भावविवर्जितम् । अबुध्यमानो ग्रन्थार्थमभीष्टोत्साहवर्जितः ॥१२३
ईदृशं वाचयेद्यस्तु वाचकः क्ष्माधिपेश्वर । क्रोधनोऽप्रियवादी च अज्ञानाद्ग्रन्थदूषकः ॥१२४
बुध्यते न च कष्टाच्च स ज्ञेयो वाचकाधमः । विस्पष्टमद्भुतं शांतं रसभावसमन्वितम् ॥१२५
अबुध्यमानो ग्रन्थार्थं वाचयेद्यस्तु वाचकः । स ज्ञेयो राजसो राजन्निदानीं सात्त्विकं शृणु ॥१२६
विस्पष्टमद्भुतं शान्तं स्पष्टाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् ॥१२७
अत्यर्थं बुध्यमानस्तु ग्रन्थार्थं कृत्स्नशो नृप । ब्राह्मणादिषु वर्णेषु आचार्यो विधिवन्नृप ॥१२८
य एवं वाचयेद्राजन्स ज्ञेयः सात्त्विको बुधैः । श्रद्धाभक्तिविहीनो यो लोभिष्ठः कटुको यथा ॥१२९
हेतुवादपरौ राजंस्तथासूयासमन्वितः । नित्यां नैमित्तिकां काम्यामाददद्दक्षिणां नृप ॥१३०
वाचको यो महाबाहो शृणुयाद्यस्तु मानवः । स ज्ञेयस्तामसो राजञ्छ्रावको मानवोऽपि सः ॥१३१
न तस्य पुरतो वीर वाचयेत्प्राज्ञ एव हि । प्रसङ्गाच्छृणुयाद्यस्तु श्रद्धाभक्तिविवर्जितः ॥१३२
राजन्कौतुक पात्रं स ज्ञेयो राजसो भवेत् । संत्यज्य सर्वकार्याणि भक्त्या श्रद्धासमन्वितः ॥१३३
सततं पूजयेद्यस्तु वाचकं श्रद्धया मुदा । नित्ये नैमित्तिके काम्ये गुरून्वै देवतास्तथा ॥१३४
य एवं शृणुयाद्वीर स ज्ञेयः सात्त्विको बुधैः । व्यासः पूज्यः श्रावकाणां यथा व्यासवचो नृप ॥१३५
तस्मात्पूज्यतमो नान्यः श्रावकाणां नृपोत्तम । यतः स वै गुरुस्तेषां ज्ञानदाता सदा नृप ॥१३६

---

पदच्छेद तथा भावहीन उच्चारण करने वाला ग्रन्थ के अर्थों को भली भाँति न जानने वाला, एवं उत्साह हीन, पारायण करने वाले को 'वाचक' कहा गया है, तथा क्रुद्ध स्वभाव, कठोर वाणी, अज्ञानता वश ग्रंथ को दूषित करने वाले एवं परिश्रमपूर्ण कष्ट के अनुभव करनेपर भी अर्थों को न जानने वाले को 'वाचकाधम' बताया गया है। राजन्! ...

चतुर्णामिह वर्णानां नान्यो बन्धुः प्रचक्ष्यते । व्यासादृते नृपश्रेष्ठ इतीयं वैदिकी श्रुतिः ॥१३७
तस्मात्सर्वप्रयत्नेन पूजयेद्वाचकं सदा । स गुरुः स पिता माता स बन्धुः स सुहृत्तथा ॥१३८
वाचको नृपशार्दूल विप्रादीनामशेषतः । इत्थं व्यासो गुरुर्ज्ञेयः पूज्यो मान्यो द्विजातिभिः ॥१३९
शृण्वन्ति ये नरा राजन्स तेषां गुरुरुच्यते । पूजार्थं तस्य समयः श्रावकाणामुदाहृतः ॥१४०
ये शृण्वन्ति नृपश्रेष्ठ मासि मासि ददन्ति ते । स्वर्णमाषकमेकस्मै वाचकाय पृथक्पृथक् ॥१४१
द्वादश्यां चामावस्यायामथ वा रवि सङ्क्रमे । सा नित्या दक्षिणा तस्यां या च श्रेयोऽर्थमात्मनः ॥१४२
अयने विषुवे चैव चन्द्रसूर्यग्रहे तथा । प्राप्ते वापरपक्षे च दानं तस्मै स्वशक्तितः ॥१४३
देयं स्याच्छ्रावकैस्तात तं मुक्त्वा नान्यतो नृप । प्रथमं तस्य दातव्यं श्रेयोऽर्थं श्रावकैः सदा ॥१४४
अदत्त्वा तस्य येन्यस्मै सम्प्रयच्छन्ति श्रावकाः । अवमानः कृतस्तैस्तु वाचकस्य भवेन्नृप ॥१४५
कृत्वावमानमथ तैः प्राप्यते यत्फलं नृप । ब्राह्मणाद्यैः समस्तैश्च तच्छृणुष्व वरानन ॥१४६
शूद्रत्वं ब्राह्मणो याति क्षत्रियो याति काकताम् । जायते च तथा वैश्यः शूद्रश्चाण्डालतां व्रजेत् ॥१४७
तस्मात्पूज्यो नृपश्रेष्ठ प्रथमं वाचको बुधैः । आपत्काले च वृद्धौ च यतश्चासौ गुरुः स्मृतः ॥१४८
वैशाख्यामयने वीर तृतीयायां च सुव्रत । कार्त्तिक्यामथ मार्ग्यां च सम्पूज्यः प्रथमं भवेत् ॥१४९

---

की श्रुतियों का यह कहना है कि चारों वर्णों के व्यास का अतिरिक्त कोई बन्धु नहीं होता है ।१३७। इसलिए सभी भाँति प्रयत्नशील रहकर वाचक की सैदव पूजा करनी चाहिए, क्योंकि वहीं गुरु, पिता, माता, बंधु एवं मित्र है ।१३८। नृपशार्दूल ! निखिल ब्राह्मणों के लिए भी वाचक उसी भाँति पूज्य बताया गया है । पुनः इस प्रकार के व्यास को गुरु जानना चाहिए और द्विजातियों के लिए वही पूज्य एवं मान्य है ।१३९। राजन् ! जिनके लोग कथा श्रवण करते हैं, उन सभी के वह गुरु कहलाता है । उसकी पूजा

पर्वस्वन्येषु च विभो सम्पूज्यो धर्मतः स्मृतः । हिरण्यं च सुवर्णं च धनं धान्यं तथैव च ॥१५०
अन्नं चापि तथा पक्वं मांसं च कुरुनन्दन । दातव्यं प्रथमं तस्मै श्रावकैर्नृपसत्तम ॥१५१
वाचकस्तु यथा नित्यं सुखमास्ते नराधिप । न पीड्यते यथा द्वन्द्वैस्तथा कार्यं वरानन ॥१५२
हेमन्ते लोमशा देयाश्छत्रं प्रावृषि सत्तम । उपानहौ कालयोग्ये काले चैवानुलोमशः ॥१५३
इत्थं द्वन्द्वविनिर्मुक्तः स येषां वाचको नृप । ते धन्याः श्रावका लोके ते गताः परमं पदम् ॥१५४
आत्मना तु कथं वीर सुखमिच्छेद्विचक्षणः । विषमस्थे गुरौ राजन्यतश्च स गुरुः स्मृतः ॥१५५
वाचकश्रावकाणां च तस्माद्द्वन्द्वं विघातयेत् । यत्नः कार्यः श्रावकैश्च वाचकस्य जनाधिप ॥१५६
इत्थं पूज्यः सदा व्यासः श्रेयोऽर्थं प्रथमं नृप । भर्ता पूज्यो यथा स्त्रीणां सर्वासां वै महीपते ॥१५७
श्रावकाणां तथा राजन्वाचकः पूज्य उच्यते । उपाध्यायस्तु शिष्याणां यथा भागवतो हरिः ॥१५८
सौराणां च यथा भानुः शैवानां शङ्करो यथा । वाचकस्तु तथा पूज्यः श्रावकाणां नराधिप ॥१५९
दक्षिणां ददता नित्यं श्रोतव्यं भूतिमिच्छता । पूर्वोक्तमाषकं तस्मै वाचकाय जनाधिप ॥१६०
यदा दातुं न शक्नोति माषकं काञ्चनस्य तु । रजतस्य तदा देयं माषकं श्रेयसे नृप ॥१६१
तदभावे हिरण्यं च वित्तशाठ्यविवर्जितः । मृत्तिकापि हि दातव्या प्राप्नोति सत्फलं शुभम् ॥१६२
इत्येषा दक्षिणा नित्या मासि मासि भवेन्नृप । नैमित्तिका भवेद्राजन्ग्रहणादिषु पर्वसु ॥१६३

---

धार्मिक पूजा के उपरांत हिरण्य, सुवर्ण, धन, धान्य एवं अन्न समेत कुरुनन्दन ! पके मांस भी श्रोताओं को चाहिए उन्हें प्रदान करें ।१५०-१५१। नराधिप ! वाचक को जिस किसी उपाय द्वारा दुःख द्वन्द्व की मुक्ति पूर्वक नित्य सुख प्राप्ति हो, वही श्रोताओं को करना चाहिए ।१५२। हेमन्त ऋतु के समय कम्बल वर्षा के समय छत्ते, तथा शीत और गर्मी के समय पादत्राण (जूते) प्रदान करने चाहिए ।१५३। नृप ! इस प्रकार जिन श्रोताओं

अमले वाससी राजन्गन्धमाल्यविभूषणे । समाप्ते पर्वणि विभो दातव्ये भूतिमिच्छता ॥१६४
ज्ञात्वा सर्वसमाप्तिं तु पूजयेच्छ्रावको ध्रुवम् । आत्मानमपि विक्रीय य इच्छेत्सफलं श्रुतम् ॥१६५
नैमित्तिकां च नित्यां च दक्षिणामप्रदाय च । शृणोति च सदा यस्तु तस्य तन्निष्फलं श्रुतम् ॥१६६
यथा च दक्षिणाहीनाद्यज्ञान्न फलमश्नुते । तथा श्रुतं च राजेन्द्र दक्षिणारहितं स्मृतम् ॥१६७
चतुर्गुणा भवेद्राजन्या नित्या दक्षिणा विभो । समाप्ते पर्वणि विभो इत्याह भगवाञ्छिवः ॥१६८
इत्येष कथितो राजन्पुराणश्रवणे विधिः । यतश्च विधिहीनं तु न कर्मफलमुच्यते ॥१६९
स्नानं दानं जपो होमः पितृदेवाभिपूजनम् । विधिपूर्वं स्मृतं ज्ञेयं यथेह कुरुनन्दन ॥१७०
फलदं नृपशार्दूल पुराणश्रवणं तथा । यथार्थं कथितं तुभ्यं विधिना श्रवणं मया ॥१७१
यथोक्तं तु यथा जीवं यथोक्तं ब्रह्मवादिना । स ब्राह्मणो महाराज सर्वलोकेषु पूजितः ॥१७२
यथाश्रुतं महाबाहो तथेदं कथितं तव । भास्करस्य तु माहात्म्यं माहात्म्यं वाचकस्य तु ॥१७३
तथा च सप्तमीकल्पः सर्वपापभयापहः । अनेन विधिना यस्तु पूजयेत्सततं नरः ॥१७४
भगलोकं समासाद्य त्रिषु लोकेषु गीयते । ततोऽर्कलोकमासाद्य गच्छेच्चित्रशिखण्डिनः ॥१७५
तस्मादपि महाबाहो गच्छेल्लोकं दिवाकरम् । अर्कलोके ततो यातस्ततो गोलोकमश्नुते ॥१७६

---

विभो ! पर्व की समाप्ति में अपने एश्वर्य प्राप्ति के लिए स्वच्छ दो वस्त्र, गंध, माल्य, एवं आभूषण प्रदान करने चाहिए । सब की समाप्ति में अपने कथा सुनने को सफल बनाने के लिए श्रोता को चाहिए कि अपने आप का विक्रय कर वाचक की निश्चित पूजा करे ।१६४-१६५। नैमित्तिक या नित्य के (पूजन विधान

ऋतस्य च ततो गच्छेत्कञ्जजस्य ततः परम् । दशानां राजसूयानामग्निष्टोमशतस्य च ॥१७७
श्रवणात्फलमाप्नोति पितामहवचो यथा ॥१७८

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे आदित्यमाहात्म्यवाचकमाहात्म्य-पुराणश्रवणविधिवर्णनं नाम षोडशाधिकद्विशततमोऽध्यायः ।२१६।

पूर्वार्धः समाप्तोऽयम् ॥ॐ॥ ॥श्रीनारायणार्पणमस्तु ॥

## इति श्रीभविष्ये महापुराणे प्रथमं ब्राह्मपर्व समाप्तम् ।१।

**प्रकाशक :**

प्रभात मिश्र शास्त्री
प्रधानमंत्री
हिन्दी साहित्य सम्मेलन प्रयाग
१२, सम्मेलन मार्ग, इलाहाबाद

**प्रकाशन वर्ष** : शक १९१६ : सन् १९९५

**संस्करण** : प्रथम

**स्वत्वाधिकार** : **हिन्दी साहित्य सम्मेलन**

**मूल्य** : तीन सौ पच्चीस रुपये मात्र

**मुद्रक एवं फोटो कम्पोजिंग** : **मनोज आफसेट**
२५५, चक, जीरोरोड, इलाहाबाद

**आवरण-सज्जा** : कृष्णकुमार मित्तल

# भविष्यमहापुराणम्

## (प्रथम खण्ड)

## ब्राह्मपर्व

### (हिन्दी अनुवाद सहित)

**अनुवादक :**
पण्डित बाबूराम उपाध्याय

चौखम्भा ओरियन्टालिया ☎ 3911617 3958790
Chaukhambha Orientalia
Publishers & Booksellers
Post Box No. 2206
Bungalow Road, 9-U .B., (Near Kirorimal College)
Delhi - 110007
Sanskrit, Ayurveda, Astrology, Music